# संस्कृत वार्ताः

**दिनाङ्क :- 14.10.2026** **प्रात: - 06:55**

**अथवार्ताः**

**प्रधानमन्त्री - कनाडा**

प्रधानमन्त्री नरेन्द्रमोदी तथा कनाडादेशस्य प्रधानमन्त्री मार्ककार्नी च द्वयोः देशयोः द्विपक्षीयसम्बन्धेषु प्राप्तां सकारात्मकप्रगतिम् अग्रे नेतुं तथा सामरिकसहयोगस्य प्रमुखक्षेत्रेषु सार्थकपरिणामानि प्राप्तुं सहमतिं प्रकटितवन्तौ। एतेषु क्षेत्रेषु वाणिज्यम्, ऊर्जाक्षेत्रम्, प्रौद्योगिकी, सुरक्षा तथा उभयदेशस्य जनानां मध्ये पारस्परिकसम्बन्धाः सम्मिलिताः सन्ति। उभयोः मध्ये दूरभाषमाध्यमेन सौहार्दपूर्णः फलदायकः च संवादः जातः। श्रीमोदी सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे उक्तवान् यत् भारतं कनाडादेशश्च मिलित्वा अधिकस्थिरस्य समृद्धस्य च विश्वस्य निर्माणे योगदानं दत्तः। एतन्मध्ये कनाडादेशस्य विदेशमन्त्री अनीता आनन्दः ह्यः सायङ्काले द्विदिवसीयभारतयात्रायै नवदिल्लीं सम्प्राप्तवती। यात्रायाः अवधौ सा अद्य विदेशमन्त्रिणा डॉ. एस्. जयशङ्करेण तथा कौशलविकास-उद्यमितामन्त्रिणा जयन्तचौधरिणा सह मिलिष्यति।

**बिहारम् - नौकादुर्घटना**

बिहारराज्यस्य वैशालीजनपदस्य राघोपुरदियारा-क्षेत्रे ह्यः रात्रौ गङ्गानद्यां नौकायाः विपर्ययणेन त्रयोदशजनाः मृताः। वैशालीजनपदस्य जनपदाधिकारी वर्षासिंहः वार्ताहरान् संसूचयन्ती अवदत् यत् नौकायाः विपर्ययणानन्तरं षट्-जनाः रक्षिताः। मृतकेषु अधिकांशाः अल्पवयस्काः सन्ति, ये भोजसमारोहे भागं ग्रहीतुं नौकया यात्रां कुर्वन्तः आसन्। नौकायां प्रायः पञ्चदशतः विंशतिपर्यन्तं जनाः आरूढाः आसन्। उत्तमचिकित्सायै अन्ये सप्तजनाः अन्यस्मिन् चिकित्सालये प्रेषिताः। उपराष्ट्रपतिना सी. पी. राधाकृष्णन् इत्यनेन तथा प्रधानमन्त्रिणा नरेन्द्रमोदिना च अस्यां नौकादुर्घटनायां जनहानिं प्रति दुःखं प्रकटितम्।

## बिम्सटेक् - दिल्लीघोषणा

बिम्सटेक्-सदस्यदेशानां गृहमन्त्रिणां प्रथमं सम्मेलनं नवदिल्ल्यां दिल्लीघोषणायाः स्वीकरणेन सम्पन्नम्। अस्मिन् घोषणापत्रे बिम्सटेक्-सदस्यदेशैः आतङ्कवादं समेत्य सर्वप्रकारकस्य आतङ्कवादस्य तथा आतङ्कवादं पोषकस्य हिंसात्मकस्य उग्रवादस्य च कट्वालोचनं कृतम्। घोषणापत्रे सदस्यदेशैः संयुक्तराष्ट्रचार्टर च इत्येतस्य अन्ताराष्ट्रियविधेः च अनुसारेण समग्रतया निरन्तरं च प्रयत्नैः आतङ्कवादस्य तथा हिंसात्मकस्य उग्रवादस्य च निवारणं, प्रतिरोधः, समूलोच्छेदनं च कर्तुं स्वसङ्कल्पः पुनरुक्तः सदस्यदेशैः संयुक्तराष्ट्रसङ्घस्य अधिकारपत्रस्य अन्तरराष्ट्रीयविधेः च अनुरूपं व्यापकतया निरन्तरं च प्रयत्नं कृत्वा आतङ्कवादस्य तथा आतङ्कवादं प्रोत्साहयतः हिंसात्मकस्य उग्रवादस्य निवारणं, प्रतिरोधः, उन्मूलनं च कर्तुं स्वकीयः सङ्कल्पः पुनः दृढीकृतः।

## **ऋतुविभागः**

भारतर्तुविज्ञानविभागेन अद्य तमिलनाडु-पुडुचेरी-कराईकल-जम्मू-कश्मीर-लद्दाख-गिलगित-बाल्टिस्तान-मुजफ्फराबाद चेत्येषु स्थलेषु मेघगर्जनेन, प्रबलवातेन विद्युत्पातेन च सह अतिवृष्टेः सम्भावना व्यक्ता।

## **क्रिकेट्**

पुरुषक्रिकेट्-क्रीडायां भारतम् अद्य हैदराबादे चतुर्थे विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-प्रतिस्पर्धायां वेस्टइण्डीज्-दलं सम्मुखीकरिष्यति। एषा स्पर्धा भारतीयसमयानुसारं सायं सप्तवादने आरप्स्यते।

गत रविवासरे इन्दौरनगरे आयोजितायां तृतीयायां विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-स्पर्धायां वेस्टइण्डीज्-दलं चतुर्दशधावनाङ्कैः पराजित्य भारतं पञ्चस्पर्धात्मिकायां शृङ्खलायां द्वि-एकम् इति अन्तरेण अग्रे वर्तते।

।। **इति वार्ताः**।।